শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৩৬

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৩৬

*পরশুরামাৱতারৱর্ণনম্*

অত্রেঃ পুত্রতযা পুরা ত্বমনসূযাযাং হি দত্তাভিধো
    জাতঃ শিষ্যনিবন্ধতন্দ্রিতমনাঃ স্বস্থশ্চরন্ কান্তযা।
দৃষ্টো ভক্তমেন হেহযমহীপালেন তস্মৈ ৱরা-
    নষ্টৈশ্বর্যমুখান্ প্রদায দদিথ স্বেনৈৱ চান্তে ৱধম্॥ ১ ॥

সত্যং কর্তুমথার্জুনস্য চ ৱরং তচ্ছক্তিমাত্রানতং
    ব্রহ্মদ্বেষি তদাখিলং নৃপকুলং হন্তুং চ ভূমের্ভরম্।
সঞ্জাতো জমদগ্নিতো ভৃগুকুলে ত্বং রেণুকাযাং হরে
    রামো নাম তদাত্মজেষৱরজঃ পিত্রোরধাঃ সম্মদম্॥ ২ ॥

লব্ধৱাম্নাযগণশ্চতুর্দশৱযা গন্ধর্ৱরাজে মনা-
    গাসক্তাং কিল মাতরং প্রতি পিতুঃ ক্রোধাকুলস্যাজ্ঞযা।
তাতাজ্ঞাতিগসোদরৈঃ সমমিমাং ছিত্বাথ শান্তাত্ পিতু-
    স্তেষাং জীৱনযোগমাপিথ ৱরং মাতা চ তেদাদ্ৱরান্॥ ৩ ॥

পিত্রা মাতৃমুদে স্তৱাহৃতৱিযদ্ধেনোর্নিজাদাশ্রমাত্
    প্রস্থাযাথ ভৃগোর্গিরা হিমগিরাৱারাধ্য গৌরীপতিম্।
লব্ধৱা ততপরশুং তদুক্তদনুজচ্ছেদী মহাস্ত্রাদিকং
    প্রাপ্তো মিত্রমথাকৃতৱ্রণমুনিং প্রাপ্যাগমঃ স্বাশ্রমম্॥ ৪ ॥

আখেটোপগতোর্জুনঃ সুরগৱীসম্প্রাপ্তসম্পদ্গণৈ-
    স্তৱতপিত্রা পরিপূজিতঃ পুরগতো দুর্মন্ত্রিৱাচা পুনঃ।
গাং ক্রেতুং সচিৱং ন্যযুঙ্ক্ত কুধিযা তেনাপি রুন্ধন্মুনি-
    প্রাণক্ষেপসরোষগোহতচমূচক্রেণ ৱতসো হৃতঃ॥ ৫ ॥

শুক্ৰোজ্জীৱিততাতৱাক্যচলিতক্ৰোধোথ সখ্যা সমং
    বিভ্ৰদধ্যাতমহোদৰোপনিহিতং চাপং কুঠাৰং শৰান্।
আৰূঢঃ সহৱাহয়ন্তৃকৰথং মাহিষ্মতীমাৱিশন্
    ৱাগভিৰ্ৱতসমদাশুষি ক্ষিতিপতৌ সম্প্ৰাস্তথাসসঙগৰম্॥ ৬ ॥

পুত্ৰাণামযুতেন সপ্তদশভিশ্চাক্ষৌহিণীভিৰ্মহা-
    সেনানীভিৰনেকমিত্ৰনিৱহৈৰ্ৱ্যাজৃম্ভিতাযোধনঃ।
সদ্যস্তৱতককুঠাৰবাণৱিদলন্নিশশেষসৈন্যোতকৰো
    ভীতিপ্ৰদ্ৰুতনষ্টশিষ্টতনযস্তৱামাপতদ্ধেহযঃ॥ ৭ ॥

লীলাৱাৰিতনৰ্মদাজলৱলল্লঙকেশগৰ্ৱাপহ-
    শ্ৰীমদবাহুসহস্ৰমুক্তবহুশস্ত্ৰাস্ত্ৰং নিৰুন্ধন্নমুম্।
চক্ৰে ত্বয্যথ ৱৈষ্ণৱেপি ৱিফলে বুধৱা হৰিং ত্বাং মুদা
    ধ্যাযন্তং ছিতসৰ্ৱদোষমৱধীঃ সোগাত্ পৰং তে পদম্॥ ৮ ॥

ভূযোমৰ্ষিতহেহযাত্মজগণৈস্তাতে হতে ৰেণুকা-
    মাঘ্নানাং হৃদযং নিৰীক্ষ্য বহুশো ঘোৰাং প্ৰতিজ্ঞাং ৱহন্।
ধ্যানানীতৰথাযুধস্তৱমকৃথা ৱিপ্ৰদ্ৰুহঃ ক্ষত্ৰিযান্
    দিকচক্ৰেষু কুঠাৰযন্ ৱিশিখযন্ নিঃক্ষত্ৰিযাং মেদিনীম্॥ ৯ ॥

তাতোজ্জীৱনকৃন্নৃপালককুলং ত্ৰিসসপ্তকৃত্বো জযন্
    সন্তৰ্প্যাথ সমন্তপঞ্চকমহাৰক্তহ্ৰদৌঘে পিতৃঋন্।
যজ্ঞে ক্ষ্মামপি কাশ্যপাদিষু দিশন্ সালৱেন যুধ্যন্ পুনঃ
    কৃষ্ণোমুং নিহনিষ্যতীতি শমিতো যুদ্ধাত্ কুমাৰৈৰ্ভৱান্॥ ১০ ॥

ন্যস্যাস্ত্ৰাণি মহেন্দ্ৰভূভৃতি তপস্তন্বন্ পুনৰ্মজ্জিতাং
    গোকৰ্ণাৱধি সাগৰেণ ধৰণীং দৃষ্টৱাৰ্থিতস্তাপসৈঃ।
ধ্যাতেষৱাসধৃতানলাস্ত্ৰচকিতং সিন্ধুং স্ৰুৱক্ষেপণা-
    দুতসাৰ্যোদধৃতকৰলো ভৃগুপতে ৱাতেশ সংৰক্ষ মাম্॥ ১১ ॥

★★★★★★★★★★